# श्रीकामाक्षी स्तोत्रम्

काञ्चीनूपुर रत्नकङ्कण लसत् केयूर हारोज्ज्वलां
काश्मीरारुण कञ्चुकाञ्चित कुचां कस्तूरिका चर्चिताम् ।
कल्हाराञ्चित कल्पकोज्ज्वल मुखीं कारुण्य कल्लोलिनीं
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ १॥

कामाराति मनःप्रियां कमलभू सेव्यां रमाराधितां
कन्दर्पाधिक दर्पदान विलसत् सौन्दर्य दीपाङ्कुराम् ।
कीरालाप विनोदिनीं भगवतीं काम्य प्रदान व्रतां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ २॥

कादम्ब प्रमदां विलास गमनां कल्याण काञ्चीरवां
कल्याणाचल पादपद्म युगलां कान्त्या स्फुरन्तीं शुभाम् ।
कल्याणाचल कार्मुक प्रियतमां कादम्ब मालाश्रियं
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ३॥

गन्धर्वामर सिद्धचारण वधू ध्येयां पताकाञ्चितां
गौरीं कुङ्कुम पङ्कपङ्क्ति कुच द्वन्द्वाभिरामां शुभाम् ।
गम्भीरस्मित विभ्रमाङ्कित मुखीं गङ्गाध रालिङ्गितां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ४॥

विष्णु ब्रह्म मुखामरेन्द्र विलसत् कोटीर पीठस्थलां
लाक्षारञ्जित पादपद्म युगलां राकेन्दु बिम्बाननाम् ।
वेदान्तागम वेद्य चिन्त्य चरितां विद्वज्जनै रावृतां

कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ५॥

माकन्द द्रुम मूलदेश महिते माणिक्य सिंहासने
दिव्यां दीपित हेमकान्ति निवहां वस्त्रावृतां तां शुभाम् ।
दिव्याकल्पित दिव्यदेह भरितां दृष्टि प्रमोदार्पितां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ६॥

आधारादि समस्त चक्र निलयाम् आद्यन्त शून्यामुमां
आकाशादि समस्त भूतनिवहा कारा मशेषात्मिकाम् ।
योगीन्द्रैरपि योगिनी शतगणैर् आराधिता मम्बिकां
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ७॥

ह्रीङ्कार प्रणवात्मिकां प्रणमतां श्रीविद्य विद्यामयीं
ऐं क्लीं सौं रुचि मन्त्रमूर्ति निवहा कारा मशेषात्मिकाम् ।
ब्रह्मानन्द रसानु भूति महितां ब्रह्मप्रियं वादिनीं
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ८॥

सिद्धानन्द जनस्य चिन्मय सुखाकारां महायोगिनीं
मायाविश्व विमोहिनीं मधुमतीं ध्यायेत् शुभां ब्राह्मणीम् ।
ध्येयां किन्नर सिद्ध चारण वधू ध्येयां सदा योगिभिः
कामाक्षीं कलयामि कल्पलतिकां काञ्चीपुरी देवताम् ॥ ९॥

कामारिकामां कमलासनस्थां
काम्यप्रदां कङ्कणचूड हस्तां ।
काञ्ची निवासां कनक प्रभासां

कामाक्षि देवीं कलयामि सिद्धे ॥ १०॥

इति श्री कामाक्षी स्तोत्रं सम्पूर्णम् ।